International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 39-40
© 2025 IJMH
www.themultijournal.com
Received: 21-07-2025
Accepted: 26-07-2025
Publish : 31-07-2025

**Dr. Veerendra Kumar V**
Lecturer in Sanskrit,
Ballari independent PU college,
Ballary 583104

**Correspondence:**
**Dr. Veerendra Kumar V**
Lecturer in Sanskrit,
Ballari independent PU college,
Ballary 583104

# स्मृतिविचारः

**Dr. Veerendra kumar V**

दर्शनम्" इति पदस्यार्थः ज्ञानसाधनम् इति। दृश्यते अनेन इति दर्शनम् इति दर्शनपदस्य व्युत्पत्तिः। यत् साधनं जीवात्मा, परमात्मा, जगत् इत्यादीन् यथार्थतया ज्ञापयति, दर्शयति, समीक्षते वा तत् दर्शनं भवति।

मीमांसादर्शनस्य सार्वादिकं महत्वपूर्ण तत्वं धर्मविचारोऽसति भवति। धर्मः कर्मकाण्डम् आधारीकृत्य तिष्टति। अतः धर्माधर्मविवेकाय द्वादशाध्यायान् जैमिनिः रचयामास ।

**धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः।**
**प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः।।**
**अधिकारोऽतिदेशश्च सामान्येन विशेषतः।**
**ऊहो बाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात्**[1]**।।**

तत्र प्रथमाध्यायस्य प्रमाणाध्यायः इति नाम्ना व्यावह्रीयते। प्रथमाध्याये चत्वारः पदाः सन्ति। तत्र अष्ट प्रमाणानि निरूपिताः सन्ति । अथेदानीं धर्मप्रमाणतया शिष्टैः परिगृहीतानां मन्वादि-स्मृतीनां, शिष्टाचारस्य च प्रामाण्यं वक्तव्यमिति तृतीयपादः आरभ्यते। अत्र स्मृतिशब्दः वेदादिरिक्त महर्षिप्रणीतविद्यास्थानमात्रपरः। यद्यपि वेद एव धर्मे साक्षात् प्रमाणं, स्मृतयोऽपि वेदद्रष्ट्रभिः तपोनिष्टैः महर्षिभिः प्रणीतत्वात् वेदमूलकतया प्रमाणं भवितुमर्हन्ति।

न च धर्माधर्मावबोधने साक्षात्प्रभवतो वेदस्यैव जागरूकत्वात्, किमेताभिः तन्मूलकतया प्रामाण्यं भजन्तीभिः परतन्त्रभिः स्मृतिभिरिति वाच्यम्, शाखान्तरस्थाङ्गोपसंहारस्य अवश्यकत्वात्, उत्सन्नश्रुतिमूलकधर्मविशेषाभिधानस्य चापेक्षितत्वात् वेदस्यातिगम्भीरार्थतया, तत्र प्रत्यक्षवृत्या अभिहितानामर्थानां सर्वसाधारण्येन, ग्रहणसम्भवेऽपि परोक्षवृत्या निर्दिष्टानां मन्दमध्यमाधिकारिभिः दुर्ग्रहत्वाच्च तदनुजिघृक्षया स्मृतिप्रणयनमर्थवदेव भवति। तदेतत्सर्वमनु-सन्दधानः तत्रादौ सर्वसाधारण्येन वेदमूलकतया स्मृतीनां प्रामाण्यं वक्तुमुपक्रमते – **एवमष्टकाः कर्तव्या** इत्यादीनीति।

अष्टका नाम प्रतिवत्सरं माघकृष्णाष्टमीमुपलक्ष्यकर्तव्यो दिनत्रयसाध्यः, सप्तपाकयज्ञानमन्यतमः पितृदेवत्यः कर्मविशेषः। तत्कर्तव्यताबोधकानि **अष्टकाः कर्तव्याः**[2] इत्यादीनि वचनानि मन्वादिस्मृतिषु उपलभ्यन्ते। ननु मन्वादीनमपि मनुष्यत्वात्, कथं तदीया स्मृतिः प्रमाणं भवितुमर्हतीत्याशङ्कायामाह – वेदैकप्रमादादिभिरभिभूयन्ते। नन्वेवमपि वेदस्य अनन्तशाखा-त्मकत्वात् तत्र तत्रोक्तानां धर्मविशेषाणाम् अधिगमः कथमुपपद्यते तेशामित्यत आह– सर्वज्ञेष्विति। सर्वज्ञत्वं च तेषां तपः प्रभावसमधिगतमवगन्तव्यम्। भ्रमः अतस्मिन् तद्बुद्धिः। यथा शुक्तिकायां रजतबुद्धिः रज्वां सर्पबुद्धिश्च। विप्रलम्भकत्वं परप्रतारणम्। स्मृतीनां वेदमूलकत्वं सोदाहरणं विशदयति – दृश्यते च क्वचिदिति। अत्र प्रयाजाः कर्तव्या इति पाठः प्रामादिकः। प्रमा कर्तव्या इति तु सङ्गच्छते, उत्तरग्रन्थसन्दर्भानुरोधात्।

प्रपा पानीयशाला। तस्याः कर्तव्यतामवगमयतीदं स्मृतिवचनम्। तन्मूलभूतञ्च श्रुतिवचनं तैत्तिरीयशाखायामुपलभ्यते धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्नराजन्। इति। यो भ्रातृव्यवान्थ्स्यात्सस्पर्थमान एतयेष्ट्या यजेत (तै.सं.2-5-12) इत्यादिना विहतायां त्रिहविष्कायामिष्टौ याज्यात्वेन विनियुक्तस्य मन्त्रस्य उत्तरार्धमिदम्। अस्यायमर्थः राजन् दीप्यमान प्रत्न चिरन्तन हे अग्ने त्वं, इयक्ष्वे यष्टुमिच्छते, पूरवे चरुपुरोडशादिभिः हविर्भिः त्वां पूरयित्रे यजमानाय, धन्वन् धन्वनि मनुभूमौ निर्जलप्रदेशे इत्यर्थः, प्रपा इव असि शीतलपानीयशालेव प्रीतिञ्जनयसीति। मन्त्रार्थमिमं पर्यालोचयतां सतां हृति अवश्यमेव भायात् अयं मन्त्रः प्रपास्मृतेर्मूलं भवितुमर्हतीति। उदाहृतं स्मृतेर्वेदमूलकत्वं स्मृत्यन्तरेष्वतिदिशति तत्सामान्यादिति। तस्तसामान्यदितरेषु तथात्वमिति न्यायस्वरूपम्। अत्रायं प्रयोगः स्मृतयो वेदमूलाः, वैदिकमन्वा-दिप्रणीतस्मृतित्वात्, प्रपास्मृतिवत् इति। प्रत्यक्षदृष्टवेदमूलकत्वे सम्भवति, मूलान्तरकल्पनाया अन्याय्यत्वात्।

ननु प्रपास्मृतिः प्रमाणं भवितुमर्हति, तन्मूलभूतस्य वेदवाक्यस्य अस्माकं प्रत्यक्षत्वात्। इतरस्मृतीनां मूलभूतानि वचनानि न प्रत्यक्षाणि। तत्कथं तासां प्रामाण्यमितीयं शङ्कां प्राचां शास्त्रकृतां वचनमुदाहरन् समादधाति आत्मीयादिति। अयमाशयः मन्वादयो हि महर्षयः प्रत्ययिततराश्च। ते च किञ्चिद् दृष्टैव स्मरेयुः स्मरणस्यानुभवपूर्वकत्वात्। परन्तु काले गच्छति बह्वीनां वेदशाखानाम् अध्येतृदौर्बल्येन लुप्तत्वात्, इदानीमुपलभ्यमानासु शाखासु तन्मूलभूतानां वचनानामनुपलम्भो न तासां वेदमूलकतां विहन्तुमीष्टे। किञ्च प्रसिद्धः स्मृतिशब्द एव तासामनुभवपूर्वकतामवगमयति। उपोद्बलयन्ति चैतमर्थं श्रुतिं पश्यन्ति मुनयः स्मरन्ति च तथा स्मृतिम् यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः। स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः इत्यदीनि वचनानि। न च अस्मभिर्दृष्टमेव प्रबलमिति कल्पना साध्वी। यावद्दोषदर्शनम् उभयोरपि दर्शमयोः प्रमाणत्वाविशेषात्।

अस्य विरोधाधिकरणमिति मीमांसकानां व्यवहारः। अत्र भाष्य-वार्तिककारयोः मतभेदो विद्यते। तत्र प्रथमं भाष्यकारमतमुच्यते ज्योतिष्टोमाख्ये सोमयागे सदोनाम्नि मण्डपे यजमानसम्मिता कचिदौदुम्बरी शाखा निखन्यते।सा च यथा न किञ्चिदृश्येत तथा सर्वात्मना वेष्टयितव्या इति स्मृतिवाक्यस्यार्थः। उद्गाता साम स्वयं तामौदुम्बरी स्पृशन्नेव गायेत् – इति श्रुतिर्ब्रवीति। अत्र सर्ववेष्टनं चेत् क्रियेत तदा स्पर्शनं न सम्भवतिष। स्पर्शनं चेत् कर्तव्यं तदा सर्ववेष्टनं न सम्भवति। इत्थं परस्परविरोधे प्रसक्ते, परिहार उच्यते – श्रुतिः स्वतः प्रमाणभूता प्रबला। स्मृतिस्तु वेदमूलकतया प्रमाणं भवति न स्वत इति सा श्रुतितो दुर्बला। प्रबलेन दुर्बलस्य बाधो लोके प्रसिद्धः। तथा च प्रबलया स्पृष्टोद्गायेदिति श्रुत्या, सर्वा वेष्टयितव्यता इति स्मृतिर्बाध्यते। अर्थात् प्रत्यक्षवेदविरोधे स्मृतिः स्वमूलभूतां श्रुतिमनुमापयितुं न शक्नोति, अतोऽप्रमाणमिति भष्यकारो मन्यते।

अतिरात्रो नाम ज्योतिष्टोमात्मकः तदीयसप्तसंस्थानामन्यतमः सोमयागविशेषः। तस्मिन् षोडशिनामकं सोमग्रहं गृह्णीयादिति प्रथमवाक्यस्यार्थः। तं न गृण्हीयादिति द्वितीयवाक्यस्य। एकत्र अनुपसंहरणीयस्य एकस्मिन् प्रयोगे निवेशयितुमशक्यस्येत्यर्थः। न हि एकस्मिन् प्रयोगे निवेशयितुमशक्यस्येत्यर्थः। न हि एकस्मिन् प्रयोगे परस्परविरूद्धयोः ग्रहणाग्रहणयोः तेजस्तिमिरयोरिव समावेशो घटते। अतः उभयोरपि वेदवाक्यत्वेन तुल्यबलत्वात्, अन्यतरस्य बाधायोगात् विकल्पोऽङ्गीकृतः। प्रकृते च यद्यप्येकस्यामेव वेदशाखायाम् औदुम्बरीं स्पृष्टोद्गायेत् इति वचनमुपलभ्यते। तथाऽपि शाखान्तरे सर्ववेष्टनप्रतिपादकवचनमपि स्यादिति सम्भावना नापह्नोतुं शक्या। अन्यथा वेदार्थविशदीकरणार्थं प्रवृत्तः स्मृतिकृन्महर्षिः सर्ववेष्टनं कथं ब्रूयात्? तसात् सर्ववेष्टन स्मृतिः सर्वथा अप्रमाणमित्युक्तिरयुक्ता। तथात्वे अतिप्रसङ्गदोषमाह तत्सामान्यादिति। किं तर्हि प्रमाणमेव सर्ववेष्टनस्मृतिः नेत्याह यावन्मूल-दर्शनमिति। द्विविधं हि अप्रामाण्यं प्रमेयापहारलक्षणाम्, अननुष्ठापकत्वलक्षणं चेति। तत्राद्यं प्रमेयस्य सर्वात्मना अतथात्वम् अवगमयति। द्वितीयंविरूद्धप्रत्यक्षश्रुत्युपलम्भेन स्वविषये सन्देहसम्भवात् यावन्मूलदर्शनं स्वविषयस्यानुष्ठानं प्रतिबन्धाति। तत्राद्यमप्रामाण्यं सर्ववेष्टनस्मृतेर्भाष्यकारमते। द्वितीयं वार्तिककारमत इति विवेकः।

'विरोधेत्वनपेक्षं स्यादसति ह्यनुमानमिति' सूत्रे अनपेक्षपदस्य भाष्यमते अप्रामाण्यार्थकत्वेऽपि, वार्तिकमते तत् अननुष्ठानलक्षणमेवाप्रामाण्यमवगमयतीत्याह इत्येवं परमिति। सर्ववेष्टन स्मृतेः ताण्ड्यश्रुतिर्मूलमिति वाञ्छेश्वरयज्वना भट्टदीपिकाव्याख्यायामभिहितम्।

**सन्दर्भग्रन्थ**

1. जैमिनिन्यायमाला

2. मीमांसानयविवेकः